# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभाग:)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

प्रथमं प्रश्नपत्रम् - First Paper

(समय: १०.३० त: १.००) (पूर्णांका: ५०)

प्र.१. हिन्द्या/आंग्लभाषया/माध्यमभाषया वा केऽपि त्रयः श्लोकाः व्याख्येयाः । ९

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥१॥

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भः आरम्भसदृशोदयः ॥२॥

राजमार्गं समावृत्य स्थितं रक्षोबलं महत् ।
ददर्श मध्यमे गुल्मे राक्षसस्य चरान् बहून् ॥३॥

अर्धयोजनविस्तीर्णमायतं योजनं हि तत् ।
भवनं राक्षसेन्द्रस्य बहुप्रासादसंकुलम् ॥४॥

प्र.२. संस्कृतभाषया षण्णामेव उत्तरं देयम् । ६

(१) कः दुर्वृत्तं करोति ? (२) कः पञ्चत्वम् अगच्छत् ? (३) कः कुपथ्यं न उज्झति ?
(४) पक्षिणः कुत्र कूजन्ति ? (५) पशवः कुत्र चरन्ति ? (६) स्वर्णकारः कया अग्निं धमति ।
(६) रघुः पुष्कलस्वर्णं कस्मै अयच्छत् ।

प्र.३. अधस्तनस्य गद्यखण्डस्य स्वोत्तरभाषायाम् अनुवादं कुरुत । १०

राजपुरुषाः अकथयन् - 'हंस! त्वं सत्यं वदसि, तथापि काकः तव मित्रं स च चौरः । त्वं तस्य सहचरः असि, अतः मित्रस्य दण्डं सहस्व ।' इत्युक्त्वा ते हंसे बाणान् अक्षिपन् । अनेन प्रकारेण सः वराकः हंस पञ्चत्वम् अगच्छत् अत उच्यते -

**खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।**
**दशाननोऽहरत् सीतां बन्धनं च महोदधेः ।।**

प्र.४. **(क) त्रयाणां समासानां विग्रहवाक्यानि लिखत ।** ३

नरपतिः, दशाननः, वृषस्कन्धः, महासत्त्वः ।

**(ख) त्रयाणां सन्धिविच्छेदं कुरुत ।** ३

पर्यचिन्वन्, महोदधिः, उद्यानम्, महत्यपि ।

**(ग) त्रयाणां लिङ्गवचनविभक्तीः दर्शयत ।** ३

माननीयः, बलिम्, आगमैः, लक्ष्म्या ।

**(घ) पठ्-धातोः लोट्लकारे रूपाणि लिखत ।** ३

**(ङ) त्रयाणां धातूनां लकारपुरुषवचनानि लिखत ।** ३

बभूव, शशास, हनिष्यामः अवसत् ।

प्र.५. **हिन्द्या/आंग्लभाषया/माध्यमभाषया वा अनुवादः कार्यः ।** ५

(१) घनाः गर्जन्ति आकाशे । (२) पक्षिणः वृक्षेषु कूजन्ति । (३) सैनिकाः राष्ट्रं रक्षन्ति ।
(४) ग्रीष्मे आम्रवृक्षाः फलिष्यन्ति । (५) सः न किमपि भणिष्यति ।

प्र.६. **अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत ।** ५

(१) धनिक निर्धन को धन देता है (२) माधव नदी में तैरता है । (३) मैं नहीं बोलूँगा ।
(४) व्यापारी विदेशों में व्यापार करते हैं । (५) तुम क्यों शंका करते हो ?

(1) A rich man gives money to poor. (2) Madhava swims in a river. (3) I will not speak. (4) Merchants trade in foreign countries. (5) Why do you doubt?

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

द्वितीयं प्रश्नपत्रम् – Second Paper

(समयः २.०० तः ४.३०) (पूर्णांकाः ५०)

प्र.१. श्लोकत्रयं व्याख्याय स्वभाषया भावार्थोऽपि लेख्यः । ९

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।
अवकरनिकरं विकिरति तत्किं कृकवाकुरिव हंसः ।।१।।

तस्मै निशाचरैश्वर्यं प्रतिशुश्राव राघवः ।
काले खलु समारब्धाः फलं बध्नन्ति नीतयः ।।२।।

ततः सुरगणैः सार्धम् उपगम्य पितामहः ।
भगीरथं महात्मानं तप्यमानमथाब्रवीत् ।।३।।

ततस्तौ नरशार्दूलौ दीप्यमानौ स्वतेजसा ।
शुक्लमाल्याम्बरधरौ जानकीं पर्युपस्थितौ ।।४।।

प्र.२. षण्णां प्रश्नानां संस्कृतभाषया उत्तरं देयम् । ६

(१) पण्डिताः कानि कानि न आविशन्ति?

(२) राजहंसस्य कुतः अपसरणमेव शरणम्?

(३) केषां वियोगेन सरोवराणां हानिः भवति?

(४) कस्मिन् पदे रामः सुग्रीवं सन्न्यवेशयत्?

(५) कस्य नाटकस्य नायकः चारुदत्तः अस्ति?

(६) ब्रह्मा कस्मिन् जने सुप्रीतोऽभवत्?

(७) वसुधातलात् किं न उदेति?

प्र.३. **अधस्तनस्य गद्यखण्डस्य स्वोत्तरभाषयाऽनुवादं कुरुत ।** १०

तापसी - शृणोतु महाराज! एष दीर्घायुरायुर्जातमात्र एवोर्वश्या किमपि निमित्तमवेक्ष्य मम हस्ते न्यासीकृतः । यत् क्षत्रियकुमारस्य जातकर्मादिविधानं तदस्य भगवता च्यवनेनाशेषमनुष्ठितम्। गृहीतविद्यो धनुर्वेदेऽभिविनीतः ।

प्र.४. **(क) नामनिर्देशपूर्वकं त्रयाणां समासानां विग्रहं कुरुत ।** ३

पादप्रहारेण, कृतोपकारः, निसर्गस्थिता, नीरजमण्डितम् ।

**(ख) नामनिर्देशपूर्वकं त्रयाणां सन्धिविच्छेदं कुरुत ।** ३

स्वाश्रयम्, मनोरथाः, महौषधीः जनेश्वरः ।

**(ग) त्रीन् शब्दान् स्ववाक्येषु योजयत ।** ३

रघुनन्दनः, महारथः, सन्ततिः, भगवान् ।

**(घ) 'भक्ष्'-धातोः लङ्लकारे (अनद्यतनभूतकाले) सर्वाणि रूपाणि लिखत ।** ६

प्र.५. **अधस्तनेषु पञ्चानां वाक्यानां संस्कृतभाषायामनुवादं कुरुत ।** १०

(१) राम किसी को दुःख नहीं देता ।

(२) वह अपना बल बढ़ाता है ।

(३) मैं गायों का पालन करूँगा ।

(४) वह धर्म का चिन्तन करता है ।

(५) बालक क्या निगल रहा है ?

(६) घोड़ों को कौन चलाता है ?

(1) Rama never troubles others.
(2) He is increasing his strength.
(3) I will rear the cows.
(4) He is contemplating upon the Dharma (righteousness).
(5) What is a boy swallowing?
(6) Who is riding the horses?

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

तृतीयं प्रश्नपत्रम् – Third Paper

(समयः १०.३० तः १.००) (पूर्णांकाः ५०)

प्र.१. त्रीन् श्लोकान् व्याख्याय हिन्दीभाषया/आंग्लभाषया/माध्यमभाषया वा भावार्थं लिखत । ९

गेये केन विनीतौ वा कस्य चेयं कृतिः कवेः ।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम् ।।१।।

वयोवेषविसंवादि रामस्य च तयोस्तदा ।
जनता प्रेक्ष्य सादृश्यं नाक्षिकम्पं व्यतिष्ठत ।।२।।

राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशः जननीवियोगः ।
सर्वाणि मे लक्ष्मणशोकवेगमापूरयन्ति प्रविचिन्तितानि ।।३।।

सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे वनमेत्य शून्यम् ।
सीतावियोगात्पुनरप्युदीर्णः काष्ठैरिवाग्निः सहसा प्रदीप्तः ।।४।।

प्र.२. ससन्दर्भं त्रयाणां वाक्यानामर्थं विलिख्य स्वोत्तरभाषया व्याख्या कार्या । ६

(१) स्वसिद्धिं नियमैरिव । (२) आज्ञा गुरूणां हि अविचारणीया । (३) नूनं दशरथं नेतुं कालेन प्रेषितो रथः । (४) अयं पञ्चवटीदेशः सौम्यः पुष्पितपादपैः ।

प्र.३. हिन्दीभाषया/आंग्लभाषया/माध्यमभाषया वा अनुवादः कार्यः । १०

एते सरःसु अवगाहमानाः कमलाकरेषु स्वैरं रमन्ते । गीतानि रोचन्ते गजेभ्यः । गजो यथा बलवाँस्तथैव बुद्धिमान् धीरस्वभावः सगर्वगम्भीरश्च भवति । राजद्वारपुष्टोऽयं दान्तः शान्तश्च सञ्जायते । अयमस्य स्वामिनं हस्तिपकं तस्य कुटुम्बं च सम्यक् परिचिनोति ।

[P.T.O.]

प्र.४. (क) त्रयाणां विग्रहवाक्यानि विलिख्य समासनाम लिखत । ३

चन्द्रवासरे, लेखपुस्तकम्, कुशलवौ, लुप्तसंज्ञा ।

(ख) त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत । ३

चोत्थाय, रामेणापि, जलाशयः, महेश्वरः ।

(ग) त्रीणि पदानि स्ववाक्येषु योजयत । ३

समुपासते, बभूव, शालायां, यथाशक्ति ।

(घ) त्रयाणां लकारपुरुषवचनानि निर्दिशत । ३

अपठन्, सेहे, अन्वभवत्, अर्हति ।

(ङ) पठ्-धातोः लोट् लकारे सर्वाणि रूपाणि लिखत । ३

प्र.५. स्वभाषयाऽनुवादो विधेयः । १०

(१) रात्रिसमयो वर्तते ।

(२) कथमित्थम् अनर्गलं प्रलपसि ?

(३) स्पष्टं किं न वदसि ?

(४) नहि नहि विलम्बं मा कुरु ।

(५) मातुः आज्ञापालनं पुत्रस्य धर्मोऽस्ति ।

* * *

# भारतीय-विद्या-भवनम्, मुम्बई-७

(सरल - संस्कृत - परीक्षा - विभागः)

## संस्कृत-कोविदः

## SAMSKRITA KOVIDA

चतुर्थं प्रश्नपत्रम् – Fourth Paper

(समयः २.०० से ४.३०) (पूर्णांका : ५०)

प्र.१. अधस्तनेषु श्लोकेषु पञ्चानामर्थं स्वभाषायां हिन्द्यां वा लिखत । २०

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ।।१।।

उभयमेव वदन्ति मनीषिणः समयवर्षितया कृतकर्मणाम् ।
बलनिषूदनमर्थपतिं च तं श्रमनुदं मनुदण्डधसन्वयम् ।।२।।

राजा तु धर्मेण हि पालयित्वा महीपतिर्दण्डधरः प्रजानाम् ।
अवाप्य कृत्स्नां वसुधां यथावद् इतश्च्युतः स्वर्गमुपैति विद्वान् ।।३।।

सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात्सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयात् एष धर्मः सनातनः ।।४।।

धनानि भूमौ पशवश्च गोष्ठे
नारी गृहद्वारि सखा स्मशाने ।
देहश्चितायां परलोकमार्गे
धर्मोऽनुगो गच्छति जीव एकः ।।५।।

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद् धर्मो न हन्तव्यः मा नो धर्मो हतोऽवधीत् ।।६।।

प्र.२. अधस्तनयोः कस्यापि गद्यखण्डस्य स्वोत्तरभाषायामनुवादं कुरुत । १०

(क) पुरोहितस्य शरीरं उभयतः कुन्ताभ्यां चिच्छिदे । क्षणादूर्ध्वमेव गतासुरभूत्स महान् पुरोधाः । तस्य मुखं तेजसा शान्त्या च संवलितमभवत् । द्वयोरपि कुन्तौ शरीरस्थौ न बहिरागतौ । आम् द्वावपि भूपपुत्रौ सुलुण्टितौ, पीडितौ, हृतसर्वस्वौ, म्लानमुखौ बहुलमाक्रोशं चक्रतुः ।

(ख) सचिवस्य देवव्रतस्य त्रीणि मित्राण्यासन् । यानि सेनजितो जीवने बद्धादराणि अविद्यन्त । देवव्रतः सर्वतः प्रागगच्छत् स्नेहाधीनस्य सहमित्रस्य सदने सत्वरम् । सहमित्रेण सह देवव्रतस्य महत्तम एतावान्तसम्बन्धोऽभूत्, यदस्य श्रीमतो वेश्मनि जीवनपर्यन्तमपि न्यवसन्तं देवव्रतं न विज्ञातुमर्हेद् राजा ।

प्र.३. अधस्तनेषु द्वौ लघुनिबन्धौ लेख्यौ । १०

कालिदासः, श्रीहर्षः, दण्डी, भासः

प्र.४. निम्नलिखितेषु द्वयोः टिप्पणी कार्या । १०

मेघदूतम्, शिशुपालवधम्, दशकुमारचरितम् ।

* * *